बहुशतः प्राप्य फलकोषाभिवाहिनीः। प्रपीड्य धमनी र्वृद्धिं करोति फलकोषयोः। दोषास्रमेदोमूत्रान्त्रैर्वृद्धिः सप्तधा गदः। मूत्रान्त्रजातावनिलाद्धेतुभेदस्तु केवलम्। वातपूर्णाद्दृतस्पर्शो रूक्षोवातादहेतुरुक्। पक्वोदुम्बरसङ्काशः पित्ताद्दाहोष्मपाकवान्। कफाच्छीतो गुरुः स्निग्धः कण्डूमान् कठिनोऽल्परुक्। कृष्णस्फोटावृतः पित्तवृद्धिलिङ्गश्च रक्तजः। कफवन्मेदसा वृद्धिर्मृदुस्तालफलोपमः। मूत्रधारणशीलस्य मूत्रजः स तु गच्छतः। अम्भोभिः पूर्णदृतिवत् क्षोभं याति सरुङ्मृदुः। मूत्रकृच्छ्रमधः स्याच्च चालयन् फलकोषयोः। वातकोपिभिराहारैः शीततोयावगाहनैः। धारणे रण भाराध्वविषमाङ्गप्रवर्त्तनैः। क्षोभणैः क्षुभितश्चान्यैः क्षुद्रान्त्रावयवं यदा। पवनो विगुणीकृत्य स्वनिवेशादधोनयेत्। कुर्य्याद्वङ्क्षणसन्धिस्थो ग्रन्थ्याभं श्वयथुं तदा। उपेक्ष्यमाणस्य च मुष्कवृद्धिमाध्मानरुक् स्तम्भवतीं स वायुः। प्रपीडितोऽन्तःस्वनवान् प्रयाति प्रध्मापयन्नेति पुनश्च मुक्तः। अन्त्रवृद्धिरसाध्योऽयं वातवृद्धिसमाकृतिः”

**कुरण्डक** पु० कुरण्टक+पृषो०। कुरण्टकवृक्षे रायमुकुटः

**कुरर** पुंस्त्री० कुङ् शब्दे क्ररन्। (कुरल) विहगे अमरः स्त्रियां जातित्वात् ङीष्। “तत्र मामनयद्रक्षः क्रोशन्तीं कुररीमिव” भा०व० अ०२१०८ “देवीं रोरूयमाणां कुररीमिवार्त्तम्” भा० स०२३५१ ङीषन्तः २मेष्यां हेमच०।

**कुरराङ्घ्रि** पु० कुररस्याङ्घ्रिरिव। देवसर्षपे राजनि०

**कुररीरुता** स्त्री० “कुररीरुता नजभजैर्लगयुक्” इत्युक्त लक्षणे चतुर्द्दशाक्षरपादके वर्णवृत्तभेदे। “अनतिचिरोज्झितस्य जलदेन चिर स्थितबहुबुद्बुदस्य पयसोऽनुकृतिम्” माघः।

**कुरल** पुंस्त्री० कुरर+रस्य लः। स्वनामख्याते पक्षिभेदे स्त्रियां जातित्वात् ङीष्। २चूर्णकुन्तले पु० धरणिः।

**कुरव** पु० अल्पमकरन्दवत्त्वादलीनामीषद् रवो यत्र। १रक्तझिण्टयाम्, २ कुरवके, शब्दर० ३सितमन्दारे च। कुगतिस०। ४कुत्सितशब्दे। बहु०। ५तथाशब्दयुक्ते त्रि०। ततः स्वार्थे क। तेष्वेवार्थेषु(कुडचि) इति ख्याते ६पुष्पवृक्षे। “कुरवकास्तवकव्यतिषङ्गिणीति” माघः।

**कुरस** पु०कुत्सितोरसोऽत्र। १मद्यभेदे बहु०। २कुत्सितरसयुक्ते त्रि०। ३गोजिह्वालतायां स्त्री टाप्। कुगतिस०। ४कुत्सिते रसे पु०।

**कुराह** पुंस्त्री० कुलाह+लस्य रः। ईषत्पाण्डुवर्णे कृष्णजङ्घे अश्वभेदे हेमच०।

**कुरी** स्त्री कुं भूमिं राति रा—क गौरा० ङीष्। तृणधान्यभेदे राजनि०।

**कुरीर** न० “कुञ्ज उच्च” उणा० कीरन् उच्च। १मैथुने उज्ज्वदत्तः। २शीर्षावयवभेदे च।“कुरीरमस्य शीर्षणि” अथ० ६,१३८,३, “स्तोमा आसन् प्रतिधयः कुरीरं छन्द ओपशः ऋ० १०,८५,८,

**कुरु** पु०कृ—क उच्च। १चन्द्रवंशे आजमीढन्पप्रपौत्रे १राजभेदे “योऽजमीढसुतस्त्वन्य ऋक्षः संवरणस्ततः। तपत्यां सूर्य्यकन्यायां कुरुक्षेत्रपतिः कुरुः। परीक्षित् सुधनुर्जह्नुर्निषधश्च कुरोः सुताः” भाग० ६,२२,३, यथा च तस्य तपत्यासुद्भवः तथोक्तं भा० आ० १३४अ० “एवमासीन् महाभाग तपती नाम पौर्व्विकी। तव वैवस्वती पार्थ! तापत्यस्त्वं यया मतः। तस्यां सञ्जनयामास कुरुं संवरणो नृपः। तपत्यां तपतां श्रेष्ठ! तापत्यस्त्वं ततोऽर्ज्जुन!”। कुरोर्निवासः जनपदे अण्लुप् लुपि व्यक्तिवद्वचनता। २तदीयनिवासदेशभेदे पु० भूम्नि। “कुरून् स्वपिति” सि० कौ०। स च देशः वृ०स० १४ अ० कूर्म्मविभागे “साकेतकुरुकालकोटिकुकुराश्च पारिपात्रनगः। औदुम्बरकापिष्ठलगजाह्वयाश्चेति मध्यमिदम्” मध्यस्थतयोक्तं तत्सीमादि च “हस्तिनापुरमारभ्य कुरुक्षेत्रस्य दक्षिणे। पञ्चालपूर्व्वभागे तु कुरुदेशः प्रकीर्त्तितः, इति शक्तिसङ्गमतन्त्रे उक्तम्। ‘आ मत्स्येभ्यः कुरुपाञ्चालदेश्याः” भा०क०२०८श्लोकः। तेषां राजनि अञ् बहुषु तस्य लुक्। ३तद्देशराजे पु० भूम्नि “कुरूणां स्वञ्जयानाञ्च पुरोहित आस” शत०ब्रा० २,५, “उवाच पार्थ! पश्यैतान् समवेतान् कुरूनिति” गीता। “श्रियः कुरूणामधिपस्य पालनीम्” किरा० तस्येदम् अण्। कौरव तदपत्ये पुंस्त्री “ऋक्षात् संवरणो जज्ञे कुरुः संवरणात्तथा। यः प्रयागमतिक्रम्य कुरुक्षेत्रञ्चकार ह। पुण्यञ्च रमणीयञ्च पुण्यकृद्भिर्निषेवितम्। तस्यान्ववायः सुमहान् यस्य नाम्ना स्म कौरवाः” हरिवं०३२अ०कुर्वा०अपत्ये ण्य। कौरव्य तदपत्ये पुंस्त्री बहुषु तस्य लुक्। क्वचिन्न “कौरव्याः पशवः प्रियापरिभवक्लेशोपशान्तिः फलम्” वेणीसं०। कौरव्ये साधवः अण्। कौरव्या इति तु माधवः।“स्त्रियामवन्तिकुन्तिकुरुभ्यः” इति स्त्रियां लुकि नृजातित्वादूङ् कुरूः। ४ओदने मेदि०। ५कण्ठकारिकायां शब्दच० प्रियव्रतराजपौत्रे ६आग्नीध्रराजपुत्रभेदे “तस्य सुत वा आत्म-